# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**SECOND YEAR [BATCH 2015-18]**
**B.A./B.Sc. FOURTH SEMESTER (January – June) 2017**
**Mid-Semester Examination, March 2017**

Date : 15/03/2017 **SANSKRIT (Honours)**
Time : 11 am – 1 pm Paper : IV Full Marks : 50

1. स्वाभिमतं विषय**मेकम**वलम्ब्य प्रबन्धो विरचनीयः। [1×15]
   क) संस्कृतशिक्षाया उपयोगिता। ख) अहिंसा परमो धर्मः। ग) भगिनी निवेदिता।

2. **एकः** प्रश्नः समाधेयः। [1×10]
   क) 'श्रियं दधानां शरदं ददर्श' —इत्यंशः कस्य महाकवेः कस्य महाकाव्यस्य किंनामकात् सर्गात् समाकलितः? को जनः कदा कुत्र कीदृशीं शरदं ददर्शेति समासेनोपस्थाप्यताम्। [(1+2+1)+6]
   ख) प्रभातवाताहतिकम्पिताकृतिः
   कुमुद्वतीरेणुपिशङ्गविग्रहम्।
   निरास भृङ्गं कुपितेव पद्मिनी
   न मानिनी संसहतेऽन्यसङ्गमम्।।
   —इति पद्यं सप्रसङ्गं वैशद्येन व्याख्यायताम्।
   ग) निशातुषारैर्नयनाम्बुकल्पैः
   पत्रान्तपर्यागलदच्छबिन्दुः।
   उपारुरोदेव नदत्पतङ्गः
   कुमुद्वतीं तीरतरुर्दिनादौ।।
   —इति पद्यं सप्रसङ्गं वैशद्येन व्याख्यायताम्।

3. यथाभिलाषं पद्य**मेकं** वङ्गवाण्या अनूद्यताम्। [1×5]
   क) वनानि तोयानि च नेत्रकल्पैः
   पुष्पैः सरोजैश्च निलीनभृङ्गैः।
   परस्परां विस्मयवन्ति लक्ष्मी-
   मालोकयाञ्चक्रुरिवादरेण।।
   ख) तरङ्गसङ्गाच्चपलैः पलाशै —
   र्ज्वालाश्रियं सातिशयं दधन्ति।
   सधूमदीप्ताग्निरुचीनि रेजु-
   स्ताम्रोत्पलान्याकुलषट्पदानि।।

4. क) सविग्रहं समासो निर्णेयः 3(क) इत्यस्य 'निलीनभृङ्गैः' इत्यत्र **अथवा** 3(ख) इत्यस्य 'आकुलषट्पदानि' इत्यत्र। [2]
   ख) सकारणं विभक्तिर्निर्णेया 3(क) इत्यस्य 'आदरेण' इत्यत्र **अथवा** 3(ख) इत्यस्य 'तरङ्गसङ्गात्' इत्यत्र। [2]
   ग) व्युत्पत्तिर्निर्णेया 3(क) इत्यत्र 'नेत्रकल्पैः' इति पदस्य **अथवा** 3(ख) इत्यत्र 'दधन्ति' इत्यस्य पदस्य। [1]

5. भारतीये समाजे साहित्ये च महाभारतस्य प्रभावो वैशद्येन आलोच्यताम्। [15]

——————— × ———————